योगवासिष्ठः/प्रकरणम् २ (मुमुक्षुव्यवहारप्रकरणम्)/सर्गः ०१

SEE BELLOW

इति नादेन महता वचस्युक्ते सभागतैः ।

राममग्रगतं प्रीत्या विश्वामित्रोऽभ्यभाषत ।। १

न राघव तवास्त्यन्यज्ज्ञेयं ज्ञानवतां वर ।

स्वयैव सूक्ष्मया बुद्ध्या सर्वं विज्ञातवानसि ।। २

केवलं मार्जनामात्रं मनागेवोपयुज्यते ।

स्वभावविमले नित्यं स्वबुद्धिमुकुरे तव ।। ३

भगवद्व्यासपुत्रस्य शुकस्येव मतिस्तव ।

विश्रान्तिमात्रमेवान्तर्ज्ञातज्ञेयाप्यपेक्षते ।। ४

श्रीराम उवाच ।

भगवद्व्यासपुत्रस्य शुकस्य भगवन्कथम् ।

ज्ञेयेऽप्यादौ न विश्रान्तं विश्रान्तं च धिया पुनः ।। ५

विश्वामित्र उवाच ।

आत्मोदन्तसमं राम कथ्यमानमिदं मया ।

श्रृणु व्यासात्मजोदन्तं जन्मनामन्तकारणम् ।। ६

योऽयमञ्जनशैलाभो निविष्टो हेमविष्टरे ।

पार्श्वे तव पितुर्व्यासो भगवान्भास्करद्युतिः ।। ७

अस्याभूदिन्दुवदनस्तनयो नयकोविदः ।

शुको नाम महाप्राज्ञो यज्ञो मूर्त्येव सुस्थितः ।। ८

प्रविचारयतो लोकयात्रामलमिमां हृदि ।

तवेव किल तस्यापि विवेक उद्भूदयम् ।। ९

तेनासौ स्वविवेकेन स्वयमेव महामनाः ।

प्रविचार्य चिरं चारु यत्सत्यं तदवाप्तवान् ।। १०

स्वयं प्राप्ते परे वस्तुन्यविश्रान्तमनाः स्थितः ।

इदं वस्त्विति विश्वासं नासावात्मन्युपाययौ ।। ११

केवलं विररामास्य चेतो विगतचापलम् ।

भोगेभ्यो भूरिभङ्गेभ्यो धाराभ्य इव चातकः ।। १२

एकदा सोऽमलप्रज्ञो मेरावेकान्तसुस्थितम् ।
पप्रच्छ पितरं भक्त्या कृष्णद्वैपायनं मुनिम् ।। १३
संसाराडम्बरमिदं कथमभ्युत्थितं मुने ।
कथं च प्रशमं याति कियत्कस्य कदेति वा ।। १४
इति पृष्टेन मुनिना व्यासेनाखिलमात्मजे ।
यथावदमलं प्रोक्तं वक्तव्यं विदितात्मना ।। १५
आऽज्ञासिषं पूर्वमेतदहमित्यथ तत्पितुः ।
स शुकः शुभया बुद्ध्या न वाक्यं बह्वमन्यत ।। १६
व्यासोऽपि भगवान्बुद्ध्वा पुत्राभिप्रायमीदृशम् ।
प्रत्युवाच पुनः पुत्रं नाहं जानामि तत्त्वतः ।। १७
जनको नाम भूपालो विद्यते वसुधातले ।
यथावद्वेत्त्यसौ वेद्यं तस्मात्सर्वमवाप्स्यसि ।। १८
पित्रेत्युक्ते शुकः प्रायात्सुमेरोर्वसुधातले ।
विदेहनगरीं प्राप जनकेनाभिपालिताम् ।। १९
आवेदितोऽसौ याष्टीकैर्जनकाय महात्मने ।
द्वारि व्याससुतो राजञ्शुकोऽत्र स्थितवानिति ।। २०

जिज्ञासार्थं शुकस्यासावास्तामेवेत्यवज्ञया ।
उक्त्वा बभूव जनकस्तूष्णीं सप्त दिनान्यथ ।। २१
ततः प्रवेशयामास जनकः शुकमङ्गणम् ।
तत्राहानि स सप्तैव तथैवावसदुन्मनाः ।। २२
अथ प्रवेशयामास जनकोऽन्तःपुरं शुकम् ।
राजा न दृश्यते तावदिति सप्त दिनानि च ।। २३
तत्रोन्मदाभिः कान्ताभिर्भोजनैर्भोगसंचयैः ।
जनको लालयामास शुकं शशिसमाननम् ।। २४
ते भोगास्तानि दुःखानि व्यासपुत्रस्य तन्मनः ।

नाजह्रुर्मन्दपवना बद्धपीठमिवाचलम् ।। २५
केवलं सुसमः स्वस्थो मौनी मुदितमानसः ।
अतिष्ठत्स शुकस्तत्र संपूर्ण इव चन्द्रमाः ।। २६
परिज्ञातस्वभावं तं शुकं स जनको नृपः ।
आनीतं मुदितात्मानमवलोक्य ननाम ह ।। २७
निःशेषितजगत्कार्यं प्राप्ताखिलमनोरथ ।
किमीप्सितं तवेत्याशु कृतस्वागतमाह तम् ।। २८
श्रीशुक उवाच ।
संसाराडम्बरमिदं कथमभ्युत्थितं गुरो ।
कथं प्रशममायाति यथावत्कथयाशु मे ।। २९
विश्वामित्र उवाच ।
जनकेनेति पृष्टेन शुकस्य कथितं तदा ।
तदेव यत्पुरा प्रोक्तं तस्य पित्रा महात्मना ।। ३०
श्रीशुक उवाच ।
स्वयमेव मया पूर्वमेतज्ज्ञातं विवेकतः ।
एतदेव च पृष्टेन पित्रा मे समुदाहृतम् ।। ३१
भवताप्येष एवार्थः कथितो वाग्विदां वर ।
एष एव च वाक्यार्थः शास्त्रेषु परिदृश्यते ।। ३२
यथायं स्वविकल्पोत्थः स्वविकल्पपरिक्षयात् ।
क्षीयते दग्धसंसारो निःसार इति निश्चयः ।। ३३
तत्किमेतन्महाबाहो सत्यं ब्रूहि ममाचलम् ।
त्वत्तो विश्रान्तिमाप्नोमि चेतसा भ्रमता जगत् ।। ३४
जनक उवाच ।
नातः परतरः कश्चिन्निश्चयोऽस्त्यपरो मुने ।
स्वयमेव त्वया ज्ञातं गुरुतश्च पुनः श्रुतम् ।। ३५
अविच्छिन्नचिदात्मैकः पुमानस्तीह नेतरत् ।

स्वसंकल्पवशाद्बद्धो निःसंकल्पश्च मुच्यते ।। ३६

तेन त्वया स्फुटं ज्ञातं ज्ञेयं यस्य महात्मनः ।

भोगेभ्यो विरतिर्जाता दृश्यात्प्राक्सकलादिह ।। ३७

तव बाल महावीर मतिर्विरतिमागता ।

भोगेभ्यो दीर्घरोगेभ्यःकिमन्यच्छ्रोतुमिच्छसि।।३८

न तथा पूर्णता जाता सर्वज्ञानमहानिधेः ।

तिष्ठतस्तपसि स्फारे पितुस्तव यथा तव ।। ३९

व्यासादधिक एवाहं व्यासशिष्योऽसि तत्सुतः ।

भोगेच्छातानवेनेह मत्तोऽप्यत्यधिको भवान् ।। ४०

प्राप्तं प्राप्तव्यमखिलं भवता पूर्णचेतसा ।

न दृश्ये पतसि ब्रह्मन्मुक्तस्त्वं भ्रान्तिमुत्सृज ।। ४१

अनुशिष्टः स इत्येवं जनकेन महात्मना ।

अतिष्ठत्स शुकस्तूष्णीं स्वच्छे परमवस्तुनि ।। ४२

वीतशोकभयायासो निरीहश्छिन्नसंशयः ।

जगाम शिखरं मेरोः समाध्यर्थमनिन्दितम् ।। ४३

तत्र वर्षसहस्राणि निर्विकल्पसमाधिना ।

दश स्थित्वा शशामासावात्मन्यस्नेहदीपवत् ।। ४४

व्यपगतकलनाकलङ्कशुद्धः

स्वयममलात्मनि पावने पदेऽसौ ।

सलिलकण इवाम्बुधौ महात्मा

विगलितवासनमेकतां जगाम ।। ४५

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मुमुक्षुव्यवहारप्रकरणे शुकनिर्याणं नाम प्रथमः सर्गः ।। १ ।।